450. √Sharba, to go. Pre. शर्बति । Per. शशर्ब । I Fut. शर्बिता । Aorist अशर्बीत् । Caus. शर्बयति । Desi. शिशर्बिषति । Inten. शाशर्ब्यते ।

451. √Sarba, to go. Pre. सर्बति । Per. ससर्ब । I Fut. सर्बिता । Aorist असर्बीत् । Caus. सर्बयति । Desi. सिसर्बिषति । Inten. सासर्ब्यते ॥

452. √Charba, to go. Pre चर्बति । Per. चचर्ब । I Fut. चर्बिता । Aorist अचर्बीत् । Caus. चर्बयति । Desi. चिचर्बिषति । Inten. चाचर्ब्यते ।

कुबि ४५३ आच्छादने । कुम्बति ॥

453. √Kubi, to cover, screen, clothe, conceal Pre कुम्बति । Per. चुकुम्ब । I Fut. कुम्बिता । Aorist अकुम्बीत् । Caus. कुम्बयति । Desi. चुकुम्बिषति । Inten. चोकुम्ब्यते । Noun कुम्बा 'a thick petticoat.'

लुबि ४५४, तुबि ४५५, अर्दने । लुम्बति । तुम्बति ॥

454 √Lubi, to torment, harass.Pre लुम्बति । Per. लुलुम्ब । I Fut. लुम्बिता । Aorist अलुम्बीत् । Caus. लुम्ब- यति । Desi. लुलुम्बिषति । Inten. लोलुम्ब्यते । Noun अलाबुः 'a gourd.'

455. √Tubi, to torment, harass Pre. तुम्बति । Per. तुतुम्ब । I Fut. तुम्बिता Aorist अतुम्बीत् । Caus. तुम्बयति । Desi. तुतुम्बिषति । Inten. तोतुम्ब्यते । Noun तुम्बी ॥

चुबि ४५६ वक्त्रसंयोगे । चुम्बति ॥

456 √Chubi, to kiss. Pre. चुम्बति । Per. चुचुम्ब । I Fut. चुम्बिता । Aorist अचुम्बीत् । Caus. चुम्बयति । Desi. चुचुम्बिषति । Inten. चोचुम्ब्यते ॥

(The three roots √lumb, √tumb, and √chumb are found in the Churâdi also).

षृभु ४५७ षृम्भु ४५८ हिंसार्थौ । सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृभ्यात् । षिभु षिम्भु इत्येके । सेभति । सिम्भति ॥

457 √Sribhu, 458 √Shtambhu, to injure. According to Maitreya the roots are षिभु and षिम्भु also. According to Tarangini, these are सिभु and सिम्भु also.

457. √Shribhu, Pre. सर्भति । Per. ससर्भ । I Fut. सर्भिता । Caus. सर्भयति । Aorist अससर्भत् or असीसृभत् । Desi. सिसर्भिषति or सिसर्भिषति According to Tarangini there is never ष । Inten. सरीसृभ्यते । यङ् लुक्, सरीसृभीति or सरिसृभीति or सर्सृभीति or सरीसृब्धि or सरिसृब्धि or सर्सृब्धि Past. Part Pass. सृब्धः । Ger. सर्भित्वा or सृब्ध्वा । Adjective सृभ्यम् ॥

457A √षिभु, to injure. Pre. सेभति । Per. सिसेभ । I Fut. सेभिता ।Aor. असेभीत् । Caus. सेभयति । Desi. सिसेभिषति । Int. सेसिभ्यते ॥

458. √Shrimbhu, Pre. सृम्भति । Per. ससृम्भ, ससृम्भतुः । I Fut. सृम्भिता । Ben. सृभ्यात् । Aor. असृम्भीत् । Caus. सृम्भयति । Desi. सिसृम्भिषति ॥

458B √षिम्भु । Pre. सिम्भति । I Fut. सिम्भिता ॥

शुभ ४५९, शुम्भ ४६० भासणे । 'भावने' इत्येके । 'हिंसायाम्' इत्यन्ये ॥

459 √Śubha, 460 √śumbha 1. To speak 2. To shine, adorn. 3. To injure Daiva and Maitreya give these two roots the sense of to injure., by reading śubha śumbha bhâshane cha. But Svâmi reads it without cha. This is the opinion of Atreya also. Durga gives the meaning bhâsane 'to speak, shine.' So also Dhana pâla and Śâkaṭayana. Gupta makes it begin with ष i.e. षुभ ॥

Pre. शोभति Per. शुशोभ । I Fut. शोभिता । Nouns. शुभः । auspicious.' शुभम् । 'white'. (Un .II. 13)

460 √Śumbha, to speak, to shine. Pre. शुम्भति । Per. शुशुम्भ I Fut. शुम्भिता । Here end the Gupadi roots.

अथानुनासिकान्ताः । तत्र कम्यन्ता अनुदात्तेतो दश ॥

घिणि ४६१, घुणि ४६२, घृणि ४६३ ग्रहणे । नुम् । ष्टुत्वम् ।
घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे । घृण्णते । जघृण्णे ॥

Now we give the roots whose final is a nasal. Of these the ten ending with √kami are Anudâttet.

461 √Ghiṇi, to take; to receive. Pre. घिण्णते । Per. जिघिण्णे । I Fut. घिण्णिता । II Fut. घिण्णिष्यते । Impera. घिण्णताम् । Imper. अघिण्णत । Pot. घिण्णेत । Bene. घिण्णिषीष्ट । Aor. अघिण्णिष्ट । Con. अघिण्णिष्यत । Caus. घिण्णयति । Aor. अजिघिण्णत् । Desi जिघिण्णिषते । Intens जेघिण्ण्यते । यङ् लुक्, जेघिण्णीति । जेघिण्टि । Imperfect अजेघिन् । Ger. घिण्णित्वा ॥

462. √Ghuṇi, to take, to receive. Pre. घुण्णते Per. जुघुण्णे ॥

463 √Ghṛiṇi, to take, to receive. to seize । Pre. घृण्णते । Per. जघृण्णे । Inten. जरिघृण्ण्यते । यङ् लुक् । जरीघृण्णीति or जर्घृण्णीति Imper. अजर्घृन् ॥

घुण ४६४, घूर्ण ४६५, भ्रमणे । घोणते । घूर्णते । इमौ तुदादौ परस्मैपदिनौ ॥

464. √Ghuṇa, 465 ghûrṇa, to roll, stagger, reel.

464. √Ghuṇa, Pre. घोणते । Per, जुघुणे । I Fut. घोणिता । Caus. घोणयते । Aorist. अजूघुणत् । Desi. जुघुणिषते or जुघोणिषते । Intens. जोघुण्यते । यङ् लुक् जोघुणीति or जोघुण्टि । Dual जोघुण्टः । Noun घोणा Ger. घुणित्वा or घोणित्वा ॥

465. √Ghûrṇa, to roll &c. These two roots √Ghuṇa and √Ghûrṇa are Parasmaipadi also in the Tudâdi class.

Pre. घूर्णते । The Imperfect in yaṅ luk is अजोघूर्ण् (VIII. 2. 24. S. 280)

पण ४६६ व्यवहारे स्तुतौ च । पन ४६७, च । स्तुतावित्येव संबध्यते
पृथङ्निर्देशात् । पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः । व्यवहारे तु पणते । पेणे । पणितेत्यादि । स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम् । पणायति । पणायां चकार । पेणे पणायितासि । पणितासे । पणाय्यात् । पणिषीष्ट । पनायति । पनायां चकार । पेने ॥

466. √पण and 467 √पन ॥

The first root means 'to transact business' 'to buy' as well as 'to praise.' The second root पन means only 'to praise.' The च draws in the anuvṛitti of स्तुतौ only and not that of व्यवहारे because it has been exhibited separately and not as पण, पन व्यवहारे स्तुतौ च ॥

These two roots take आय by III. 1. 28 S. 2303, but पण must then mean 'to praise' only, for it has been read along with पन in that sûtra. But when पण means 'to deal or barter &c.' the form is पणति । Per. पेणे । First Fut. पणिता ॥

The anudâtta indicatory final अ in पण and पन finds its scope only when the roots mean 'to praise,' therefore when the roots take the affix आय, they will be Parasmaipadi and not âtmanepadî. As पणायति । Per. पणायांचकार । पेणे । First Future पणायितास or पणितासे । Ben. पणाय्यात् or पणिषीष्ट ॥

466. √Paṇa, "To transact business, to buy," (2. "To praise.") The following conjugation is valid in the sense of transacting business only.

Pre. पणते । Per. पेणे । I Fut. पणिता । II Fut. पणिष्यते । Imperative पणताम् । Imper. अपणत । Pote. पणेत । Bene. पणिषीष्ट । Aorist अपणिष्ट । Condi. अपणिष्यत । Caus. पाणयति । Aorist. अपीपणत् । Desi. पिपणिषते । Inten. पम्पण्यते । Yan luk पम्पणीति or पम्पंणिट, Dual, पम्पणटः । Imperfect. अपम्पण् । Past Part. Pass. पणितम् । Adjective, पणयम् । पाणयन् । Nouns, पाणः 'trade.' पणा 'a trader.' वणिकः (Uṇ. II. 70)- विपणिः पणसम् ॥

466 A. √ Paṇa, to praise. In this sense आय is added and the conjugation is then Parasmaipadi. When आय is not added, then the forms are as given before.

Pre. पणायति । As पणायति राजानम् 'He praises the king.' Per. पणायां चकार I Fut. पणयिता । पणायितास्मि or पणितासे । Pote. पणाय्यात् । Bene. पणाय्यात् ॥

467. √Pana, to praise. Pre. पनायति । Per. पनायां चकार or पेने । Noun पनसः ॥

भाम ४६८ क्रोधे । भामते । बभामे ॥

468. √Bhāma, to be angry. Pre. भामते । Per. बभाम । I Fut. भामिता Desi. बिभामिषति । Inten. 3. S. बाभान्ति 1st. S बाभन्मि । 1. D. बाभान्वः । 1. Pl बाभान्मः । । Aorist अबाभान् । Nouns भान् भामिनी ॥

क्षमूष् ४६९ सहने । क्षमते । चक्षमे । चक्षमिषे । चक्षंसे । चक्षमिध्वे । चक्षन्ध्वे । चक्षमिवहे ॥

469. √क्षमूष् सहने 'to endure, to suffer.' The indicatory long ऊ makes it optionally aniṭ (VII. 2. 44 and 15 S. 2279 and 3025) : the ष् is for feminine अङ् (III. 3. 104 S. 3281).

Thus the Present is क्षमते । The Perfect is 3. S. चक्षमे । 2. S. चक्षमिषे or चक्षंसे, 2. P. चक्षमिध्वे or चक्षन्ध्वे ॥

In the First Person, the सेट् form is चक्षमिहे । But in the aniṭ form, the म् will be changed to न् by the following sûtra.

२३०९ । म्वोश्च । ८ । २ । ६५ ॥

मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे । क्षन्त्वम् । चक्षमिवहे-चक्षण्वहे । चक्षमिमहे—चक्षण्महे । क्षमिष्यते-क्षंस्यते । क्षमेत । आशिषि । क्षमिषीष्ट – क्षंसीष्ट । अक्षमिष्ट – अक्षंस्त ॥

2309. न is substituted for the म of a root before the affixes beginning with म and व ॥

NOTE:-As अगन्म, अगन्व the Imperfect of गम्, as in the sentence अगन्म तमसः पारम्। The शप् is elided as a Vedic diversity. So also जगन्वान् with क्वसु, the augment इट् is not added by the option allowed, owing to VII. 1. 68. This sûtra applies to those cases where the म is not at the end of a word, as it was in the last sûtra.

Thus from the root क्षमूष् we have in the perfect 1st person dual चक्षमिवहे । But when the intermediate इट् is not added, then the म् is changed to न and then to ण ॥

As चक्षमिवहे or चक्षण्वहे । so also in the plural, चक्षमिमहे or चक्षण्महे ।

469 A. √Kṣhamûsh, to endure to suffer. Pre. क्षमते । Per. चक्षमे । I Fut. क्षमिता or क्षामिता । II Fut. क्षमिष्यते or क्षंस्यते or क्षामिष्यते । Imperative क्षमताम् ।

Imperf. अक्षमत । Pote. क्षमेत । Bene. क्षमिषीष्ट or क्षंसीष्ट or क्षामिषीष्ट । Aorist अक्षमिष्ट or अक्षंस्त । Condi. अक्षमिष्यत् or अक्षंस्यत् । Pass. क्षम्यते । Aorist अक्षमि or अक्षामि । अचिक्षमत् । Caus. क्षमयति । Aorist. (VI. 4. 92. S. 2568). I. F. क्षमयिता । Ben. क्षमयिषीष्ट । Desi. चिक्षमिषते or चिक्षंसते । Inten. चंक्षम्यते । Yaṇ luk चंक्षमीति or चंक्षन्ति । The nasal is added to the reduplicate by VII. 4 85 S. 2643. Aorist अचंक्षमीत् । Past Part, Pass. क्षान्तः । Ger. क्षमित्वा or क्षान्त्वा । Infini. क्षमितुम् or क्षंतुम् । Nouns क्षमः । F. क्षमा, क्षमकः ॥

470. कमु कान्तौ । The word Kanti here means 'desire.' The root therefore means 'to desire, long for, wish.' The following sûtra applies to its conjugation.

२३१० । कमेर्णिङ् । ३ । १ । ३० ॥

स्वार्थे । ङित्वात्तङ् । कामयते ॥

2310 The affix णिङ् comes without changing the sense after the root कम 'to desire.'

The ण indicates *vriddhi* (VII. 2. 115) and ङ shows that the root takes the affixes of the Atmanepada; as, कामयते 'he desires'; so also कामयेते and कामयन्ते ॥

The Perfect is formed periphrastically by आम् which being an ârdhadhâtuka affix required the elision of णि of the root by VI. 4. 51 S. 2313. But the following sûtra prevents the elision :

२३११ । अयामन्ताल्वाय्येत्न्विष्णुषु । ६ । ४ । ५५ ॥

'आम्' 'अन्त' 'आलु' 'आय्य' 'इत्नु' 'इष्णु' एषु णेरयादेशः स्यात् । वक्ष्यमाणलोपापवादः कामयां चक्रे । 'आयादय आर्धधातुके वा' (२३०५) । चकमे । कामयिता-कमिता । कामयिष्यते-कमिष्यते ॥

2311 अय् is substittued for the इ of णि, before the affixes आम्, अन्त, आलु, आय्य, इत्नु, and इष्णु ॥

Note:—Thus कारयां चकार, हारयां चकार, गण्डयन्तः, मण्डयन्तः (formed by the Unâdi affix झच्, झ = अन्त; added to the roots गंड and मंड) आलु । स्पृहयालुः । आय्य, स्पृहयाय्यः, गृहयाय्यः । इत्नुः—स्तनयित्नुः । इष्णु—पोषयिष्णुः ॥

Note :—This sûtra could have been well dispensed with : for the इ of णि would take guṇa ए which will be changed to अय् by the rules of Sandhi, before these affixes. The substitution of अय् for इ is for the sake of the subsequent sûtra VI. 4. 56 S. 3336 however, because there इ could not be changed to अय by any sandhi-rules.

The णि is always changed to अय; therefore the अय substitution of the prsent sûtra would have been redundant, but it is taught here in order to supersede the elision declared here after in VI. 4. 51. S. 2313. Thus कामयां चक्रे ॥

The addition of आय being optional (III. 1. 31. S. 2305) we have the alternative form चकमे also.

The Future forms are:—कामयिता or कमिता ॥ कामयिष्यते or कमिष्यते ॥ In forming the Aorist, the following sûtra applies.

२३१२ । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । ३ । १ । ४८ ॥

णियन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे । 'अकाम' 'इ' 'अत' इति स्थिते ॥

2312. After a root which ends in णि (III. 1. 20, 21, 44, &c.) and after the verb श्रि 'to service,' द्रु 'to run,' and स्रु 'to drop, चङ् is the substitute of च्लि, when लुङ् follows signifying an agent.

NOTE:—The ङ prevents *guna* and *viriddhi* and च is to distinguish it from अङ् When चङ् is added there is reduplication (VI. 1. 11). The usual terminations of the Imperfect are employed after the root, when चङ् is used; a अचीकरत् 'he caused to make'; अशिश्रियत् 'he served are went'; अदुद्रुवत् 'he ran असुस्रुवत् 'it flowed.' This form is not used in Passive ; as, अकारयिषाताम् । Thus अकाम्+इ+अत ॥

Now applies the following sûtra, by which the इ (णि) is elided.

२३१३ । णेरनिटि । ६ । ४ । ५१ ॥

अनिडादावार्धधातुके परे णेर्लोपः स्यात्। परत्वात् 'एरनेकाचः-' (२७२) इति यणि प्राप्ते । + यल्लोपावियङ् यणगुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन + इति वार्तिकम् । णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः । वस्तुतस्तु 'अनिटि' इतिवचनसामर्थ्यादार्ध-धातुकमात्रमस्य विषयः । तथा चेयङादेरपवाद एवायम् । इयङ् । अततक्षत् । यण् । आटिटत् । गुणः । कारणा । वृद्धिः । कारकः । दीर्घः । कार्यते ॥

2313. The इ of the verbal stem formed with the affix णि, is elided before an ârdhadhâtuka affix which does not take the augment इट् ॥

NOTE :- This debars इयङ्. the semi-vowel य, the guṇa, Vriddhi and the long substitutions. Thus अततक्षत्, अररक्षत् आशिश्रत्, आटिटत्, कारणा, हारणा, कारकः, हारकः, कार्यते, हार्यते and ज्ञीप्सति (see VII. 4. 1 for the shortening of the stem of the Aorists in these). Why do we say 'not having the augment इट् ? Observe कारयिता and हारयिता ॥

The sûtra VI. 4. 82. S. 272. (a semi vowel is substituted for the final इ or ई of a root before a vowel begining affix &c) being subsequent in order of Ashṭâdhyâyi would debar the present sûtra and prevent the elision of इ and cause य to be substituted instead. This however is prevented by the following.

Vártika : The rule ordaining the elision of णि (S. 2313) and that teaching the elision of अ (VI. 4. 48. S. 2308) take effect even to the supersession of the *subsequent* rules ordaining इयङ् (VI. 4. 78 S. 2290), or semi-vowel य (VI. 4. 82 S. 272), or guṅa, (VII 3. 84. S. 2168 &c.) or vriddhi, (VII. 2. 115 S. 254), or lengthening.

NOTE:-The elision of अ supersedes only the two rules of vriddhi, lengthening and not the others. The elision of इ (णि) supersedes *all* the above *five* rules of iyaṅ, yaṇ, guṇa, vriddhi and lengthening.

Q. There is no necessity for this vartika with regard to णि for if the five rules mentioned above were not to be superseded by णि elision, then this rule will find no scope anywhere. And as scope must be given to every rule, the present sûtra inferentialy and *ex necessitate* supersedes the above rules.

Ans. The vârtika is not unnecessary. The णि elision finds its unrestricted scope before the ârdhadhâtuka affixes like क्तिच् (III. 3. 174. Si 3313). Thus from ✓

पाचयति we have पाक्तिः, from √याजयति, याष्टिः । The intermediate इट् is prevented here by VII. 2. 9 S. 3163. Hence if this vârtika were not taught, the णि would be elided only before the ârdhadhâtuka ant affix क्तिच् and no where else.

As a matter of fact, the force of the word अनिटि in the sûtra is that the rule of the elision of णि applies to *all* ardhadbâtuka affixes, and not only to a single affix *ktich*.

NOTE :—Had the present sûtra not superseded इयङ् &c, then it would have been more proper to draft it as णेः only without the word अनिटि । For the sûtra णेः with the anuvritti of आर्धधातुके read into it, would apply to the affix क्तिच्, only after the rules इयङ् यण् &c had restricted its scope. So there would be no neccessity of adding अनिटि । The very fact that the word अनिटि is added shows that the sûtra has for its scope *all* ardhadbâtuka affixes, and therefore it is an exception by anticipation to the rules of iyań &c.

Thus इयङ् is superseded in अततक्षत् । It is चङ् Aorist. There is no scope of Guṇa here, as चङ् is ङित् and यण् of sûtra VI. 4 82 S. 272 has also no scope, as the इ (णि) in ताक्षि is preceded by a conjunct consonant क्ष । Therefore इयङ् is the only rule left that would have applied to this णि । The present vârtika debars इयङ् but causes the elision of इ ॥

Similarly यण् (semivowel) substitution is superseded in आटिटत् । Guṇa is superseded in कारणा and vriddhi in कारकः and lengthening in कार्यते ॥

Thus अकाम्+इ+अ+त = अकाम्+०+अ+त । Now applies the following.

२३१४ । णौ चङ्युपधाया ह्रस्वः । ७ । ४ । १ ॥

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ॥

2314. A short is substituted for the vowel, standing in a penultimate position, in the णि-formed stem, when the affix चङ् (sign of the Reduplicate Aorist) follows.

Thus अकाम्+इ+अ+त=अकाम्+अ+त (VI. 4. 51 S. 2313)= अकम्+अ+त (VII. 4. 1. S. 2314).

Now applies the following sûtra which causes reduplication.

२३१५ । चङि । ६ । १ । ११ ॥

चङि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य ॥

2315. Of a non-reduplicate root there is reduplication when the affix चङ् of the Aorist follows.

Dr. Ballantyne translates it thus:-"When चङ् follows, there are two in the room of the first portion, containing a single vowel, of an unreduplicated root but the reduplication is of the second portion of a root that begins with a vowel"

The first syllable is reduplicated if the first portion of the root begins with a consonant; the second syllable is reduplicated if the first portion begins with a vowel.

Thus अकम्+अ+त = अचकम्+अ+त ॥

Now applies the following atideśa sûtra.

२३१६ । सन्वल्लघुनि चङ्परेऽनग्लोपे । ७ । ४ । ९३ ॥

'चङ्परे' इति बहुव्रीहिः । स च 'अङ्गस्य' इति च द्वयमप्यावर्तते । अङ्गसंज्ञानिमित्तं यच्चङ्परं

णिरिति यावत् तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यादग्लोपेऽसति। अथवा 'अङ्गस्य' इति नावर्तते। चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत्॥

2316. In the reduplicated Aorist of the णि—stems, the reduplicate adapts itself to that of the Desiderative, when the vowel of the root is light, and the root has not lost its end-vowel before the णि affix.

The word चङ्परे is a Bahuvrihi compound and therefore it means णि॥ This word णि so qualified, as well as the word अङ्गस्य should both be twice employed in this sûtra, in order to give the full meaning. We explain therefore the sûtra thus :—"That णि which is followed by that affix चङ् which gives the designation of अङ्ग to the root"—this is one portion. The next part is—"a short vowel which follows such णि, and the abhyâsa of the aṅga which follows such short vowel—of that abhyâsa, the operations are like those of the Desiderative, before the णि, when no अक् vowel is elided."

Or the word अङ्गस्य is not repeated. Then the sútra would mean 'that aṅga which stands before that णि which is followed by चङ्—the abhyâsa of such an aṅga, when followed by a short vowel,—on that abhyâsa, the operations are like those of the Desiderative &c.

NOTE :—Dr. Ballantyne has translated this sûtra as follows :—Let the effect be like as if सन् (III. 1. 7 S. 2608) had followed, on the reduplicate, if followed by a light vowel of an inflective base to which णि followed by चङ् is affixed—provided there is not the elision of any letter in the pratyâhâra अक् occasioned by the affixing of णि (as, for example under the provisions of VI. 4. 48 S. 2308).

NOTE :—The words of this sûtra require a little detailed explanation. The word सन्वत् means "like unto सन् or Desiderative" ; i. e. as the Desiderative is treated, so should the चङ् Aorist of the णि stems. The words लघुनि and चङ्परे are both in the Locative case, but not in apposition with each other, but refer to different objects. लघुनि means 'when a light vowel follows,' namely that reduplicate which is followed by the light root-vowel. The operations to be performed on such a reduplicate, in the चङ् Aorist, after the णि. are the same, as on the reduplicate of the Desiderative. अन्-अक्-लोपे "provided that a simple vowel of the Pratyâhâra अक् has not been elided." We read the word णि into this sûtra, because there can be no other root which will form चङ् Aorist. णि stems form such Aorist. (III. 1. 48), as well as the simple roots श्रि, द्रु and स्रु। The words चङ्परे is a Bahuvrihi and qualifies the word अङ्ग understood: that *stem* which is followed by चङ् ; therefore, it refers to the णि *stem*, and not to the simple roots śri, dru and sru. The *light* vowel, therefore, refers to the light vowel of the णि-*stem* before चङ्॥

The word अनग्लोपे is in apposition with चङ्परे। Thus कम्+णिङ् (III. 1. 30). =अकाम्+इ+अत् (III. 1. 48). = अकाम् +अत् (VI. 4. 51) = अकम्+अत् (VII. 4. 1) = अचकम् + अत् (VI. 1. 11) Then applies the next sútra.

NOTE :—Thus VII. 4. 79 teaches the substitution of इ for अ in the reduplicate of the Desiderative. The same substitution will take place in the reduplicate of the Aorist: as अचीकरत्, अपीपचत्। Thus by VII. 4. 80, इ is substituted for

the उ of the reduplicate in the Desiderative, the same will be the case in the re. duplicate of the Aorist, as अपीपवत् and अलीलवत्, and अजीजवत् । Thus by VII. 4. 81, इ is optionally substituted for उ in the Desiderative reduplicate of स्रु &c, the same will hold good in the Aorist-reduplicate, as असिस्रवत् or असुस्रवत्, अशिश्रवत् or अशुश्रवत्, अदिद्रवत् or अदुद्रवत्, अपिप्रवत् or अपुप्रवत्, अपिप्लवत् or अपुप्लवत्, अचिच्यवत् or अचुच्यवत् । Why do we say 'having a light vowel' ? Observe अततक्षत्, अररक्षत्, अजजागरत् ॥

By sûtra III. 1. 48 S. 2312 the roots श्रि, द्रु, and स्रु also form चङ् aorist. The sanvad bhâva however does not take place with regard to these roots: because these roots do not get the designation of अङ्ग before चङ् । The rule is therefore confined to णि-roots, for these are the roots which get the designation अङ्ग before the affix चङ् । Moreover the reduplicate must be that of the अङ्ग, which can be of णि-roots only.

२३१७ । सन्यतः । ७ । ४ । ७९ ॥

अभ्यासस्यात इकारः स्यात्सनि ॥

2317. इ is substituted for the final short अ of the reduplicate in the Desiderative.

Note:—As पिपक्षति, यियक्षति, (VIII 2. 36, 41) तिष्ठासति, पिपासति ॥ Why do we say in the Desiderative ? Observe पपाच ॥ Why do we say "for the अ" ? Observe लुलूषति ॥ Why do we say 'short अ' ? Observe पापचिषते the Desiderative of the Intensive पापच्यते ॥

Therefore अचकम् + अत = अचिकम्+अत, because चङ् is considered like सन् ॥ Now applies the following.

२३१८ । दीर्घो लघोः । ७ । ४ । ९४ ॥

लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये । अचीकमत । णिङभावपक्षे ॥

✱ कमेश्च्लेश्चङ् वक्तव्यः ✱ । णेरभावान्न दीर्घसन्वद्भावौ । अचकमत ॥

संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते ।
तत्रैव दीर्घः सन्वच्च नानेकाच्स्विति माधवः ॥ १ ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते ।
किं त्वस्यावयवः कश्चित्तस्मादेकाच्स्विदं द्वयम् ॥ २ ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥ ३ ॥
चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
णेर्विशेष्यं संनिहितं लघुनीत्यङ्गमेव वा ॥ ४ ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि संबन्धस्त्वगितामपि सिद्धये ॥ ५ ॥

2318. In the reduplicative syllable, a prosodially short vowel is lengthened in the Reduplicated Aorist of the णि-stem when the vowel of the root is light, and the root has not lost its end-vowel before the Causative णि ॥

Therefore अचिकम्+अत=अचीकमत ॥

The affix णिङ् being optional, when it is not added, then applies the following vârtika :—"The aorist of √Kam is formed by चङ् even when it does not take णिङ्" As there is absence of णि, so we have neither lengthening nor sanvadbhâva. Thus अचकमत ॥

NOTE :—In Grammar there are two opinions as regards rules of definition (संज्ञा); one is expressed by the maxim कार्यकालं सञ्ज्ञापरिभाषं and the other by यथोद्देशं सञ्ज्ञापरिभाषं ॥ The first means that a rule defining a term (*i. e.* a saṃjñâ rule) or giving a maxim of interpretation (paribhâshâ) manifests itself at the *time* of application. Whenever an occasion arises to apply such rule it appears there anew. The other means that the saṃjñâs and paribhâshâs remain where they have been originally taught, and do not appear anew each time when a particular operation is to be performed. They exert their influence from the place where they are, and do not require to be recited afresh each time that an operation is to be performed.

Now the abhyâsa is defined in the sûtra पूर्वोऽभ्यासः (VI 1. 4. S. 2178) and the word abhyâsa occurs in the sûtra 2316. In both views of the function of a definition, the sûtras पूर्वोऽभ्यासः and सन्वल्लघुनि &c. will become one sentence. But in the first view of kâryakâla paksha the one-sentence will be of different *padas* or words; in the second view the one-sentence will be of different *sentences*. Mâdhava favours the view of kâryakâla paksha with regard to the sûtra 2316: which opinion the author has summarised in the following two verses :—

Verse. 1 "According to Mâdhava, the rules of lengthening (2318) and sanvadbhâva (2316) apply there only where the kâryakâla function of a rule of definition being taken as valid, the aṅga or inflective base is reduplicated : and not where there are many-syllabled stems."

NOTE:—The sense is that in the sûtras 2316 and 2318 there is the anuvṛitti of the words aṅgasya and abhyâsasya. Here the designation of abhyâsa (reduplicate) will be given to the *first* portion of the doubled *aṅga*. Therefore the lengthening (2318) and sanvad bhâva (2316) will take place in that abhyâsa only which is the abhyâsa of an aṅga—that is where an aṅga has been reiterated, there the first portion will get the designation of abhyâsa for the purposes of the application of 2316 and 2318. As अचीकरत् and अपीपचत् ॥

Verse. 2. "But in the roots √चकास्ति, √अर्थापयति and √ऊर्णोति &c. there is no reduplication of an aṅga but only a *portion* of an aṅga is reduplicated. Therefore the two rules 2316 and 2318 are confined to monosyllabic roots."

NOTE:—Thus we have अचचकासत्, आर्तथपत् and और्णुनवत् without the application of S. 2316 and 2318. Here the whole aṅga chakâs &c. has not been reduplicated, but only a part of it, namely the first consonant in the case of chakâs and the second consonant in the case of vowel-beginning roots.

The result is that it is only in monosyllabic roots that the *whole* of aṅga is reduplicated, and not only a part of it (for there can be no such part), and consequently the dîrgha and sanvadbhâva apply to monosyllabic roots. Moreover, in this view (kâryakâla paksha), the word ekâchah in the sûtra ekâchodve prathamasya (VI. 1. 1. S. 2175), qualifies the word aṅgasya understood therein.

Obj. Let it be so, that the dîrgha and sanvadbhâva rules apply to the reduplicate of monosyllabic roots only. Then stretching this argument further the other rules that apply to reduplicates will also be restricted in their scope

such as the rules of shortening (VII. 4. 59 S. 2180), retention of first consonant (VII 4 60. S. 2179) and substitution of a palatal (VII. 4. 62. S. 2245), &c. and these will not apply to polysyllabic roots.

Verses 3and 4. As a matter of fact, if we explained the sûtra by saying aṅgasya avayavo yo' bhyâsa – 'the reduplicate which is a portion of an aṅga'— then we opine that there must be lengthening in the case of √ ûrṇu, and both (lengthening and sanvad bhâva) in the case of √ arthâpayati : while in the case of √ chakâs none of these two will apply, or if they apply, it would be under restrictions. They will not apply when laghuni is qualified by णि by being in proximity to it, but will apply when aṅga is so qualified.

Note : Thus instead of और्णुनवत् we would get और्णूनवत् । The sanvadbhâva is inappropriate here, for when नु is doubled, there is no अ in the reduplicate. and so there can be no change of अ to इ ॥

The root अर्थापय is derived from अर्थ, in the sense of अर्थमाचष्टे । The आ and पुक् augments are added before णिच् । Here both the dirgha and sanvad bhâva will apply, and we should get the form आर्तिथपत् instead of आर्तथपत् । In the case of the root √ अर्थ (उपयाच्ञायाम्), of the churâdi class, the aorist is आर्तथपत neither the dirgha nor sanvad bhava apply there.

In the root chakâs both will not apply or will apply with qualifications. If we explain the sûtra by saying chaṅ-pare ṇau yal laghu—'the reduplicate, if followed by a light vowel, in the case of a root to which णि followed by चङ् is affixed'—then there will be no application of these two rules. But if we explain the sûtra by chaṅpare ṇau yad aṅgam 'the reduplicate of an inflective base to which ṇi followed by chaṅ is affixed'—then these two rules will apply to chakâs. Thus in the first case we have अचचकासत्, in the second अचीचकासत् ॥

Verse 5. Because Kaiyyaṭa alone has given these two alternative explanations, the rules become applicable even where an ak-vowel of णि is elided : so as to make them applicable to agit roots also.

Note : There are two conflicting views, one of Haradatta and another of Kaiyyaṭa. They can be harmonised by giving them different scopes.

कमु ४७० कान्तौ । कान्तिरिच्छा ॥

470. √ Kamu, to desire. Pre. कामयते । Per. कामयाञ्चक्रे । I Fut. कामयिता । II Fut. कामयिष्यते । Imperative कामयताम् । Imp. अकामयत । Pote. कामयेत । Bene कामयिषीष्ट । Aorist अचीकमत । Caus. कामयति । Here the first णि is elided by VI. 4. 51. S. 2313. Desi. चिकामयिषते । Ger. कामयित्वा । Noun कामना ॥

470. A. √ Kamu, without णि before ârdhadhâtukas. Pre. कामयते । Per चकमे । I Fut. कमिता । II Fut. कमिष्यते । Bene. कमिषीष्ट । Aorist अचकमत । Caus कामयति (Vṛddhi by न कम्यमिचमां). Desi. चिकमिषते । Inten. चङ्कम्यते । There is no yaṇ-luk form. See √ गुपू । Past. Part. Pass. कान्तः Ger. कमित्वा or कान्त्वा । The उ makes इट् optional. Nouns कामुकः (III 2. 154. S. 3134) कम्रः (III. 2. 167. S. 3147) कमनः । कंसः (Uṇ. III. 62).

Here end the anudâttet roots ending in a nasal.

Now the thirty roots upto √ क्रमि inclusive are Parasmaipadi.

अथ क्रम्यन्तास्त्रिंशत्परस्मैपदिनः ॥

अण ४७१, रण ४७२, वण ४७३, भण ४७४, मण ४७५, कण ४७६, क्वण ४७७, व्रण ४७८, भ्रण ४७९, ध्वण ४८०, धण ४८१ शब्दार्थाः । अणति । रणति । वणति । वकारादित्वाभ्यासलोपौ न । ववणतुः । ववणिथ । धणिः कैश्चित्पठ्यते । धणति ॥

471. √Aṇa, to sound. Pre. अणति । Per. आण । I Fut. अणिता । Caus. आणयति । Aorist अ+अणिणत् । Desi. अणिणिषति । Nouns अणुः 'small,' 'a kind of grain' अण्डः (Uṇ. I. 114). अडुः or आडूः 'a boat.'

472. √Raṇa, to sound. Pre. रणति । Per. रराण । I Fut. रणिता । Aorist अरणीत् or अराणीत् । Caus. रणयति Aorist अरीरणत् or अरराणत् । Desi. रिरणिषति । Inten. रंरणयते । Yaṅ luk रंरणीति or रंरण्टि । D. रंरण्टः । Past Part. Pass. रणित or रण्डा । Nouns रणनं 'sound,' 'noise,' रणः 'War,' 'sacrifice,' रणरणकः 'anxiety'.

473. √Vaṇa, to sound. Pre. वणति । Per. ववाण । The rule VI. 4. 126 S. 2263 does not apply, because the root begins with व ; and so there is no ए nor elision of the reduplicate. ववणतुः ववणिथ । Nouns वाणः । वाणी । वाणिनी 'a clever woman.' वण्ड 'an ox without a tail.'

474. √Bhaṇa, to sound. Pre. भणति । Per. बभाण । I Fut. भणिता । Nounss भाणः । भणितिः । भंड । भांड ॥

475. √Maṇa, to sound ; murmur. Pre. मणति । Per. ममाण । मेणतुः । I Fut. मणिता । Nouns मणितम् । मणिः । मणिकः । मंडः ॥

476. √Kaṇa, to sound. Pre. कणति । Per. चकाण । I Fut. कणिता । Nouns कणः । कणिका । कंठः (Uṇ I. 103).

477. √Kvaṇa, to sound, jingle, tinkle, hum, warble, sing. Pre. क्वणति । Per. चक्वाण । I Fut. क्वणिता । Nouns क्वाणः । क्वणः 'harp.' कुणानः (Uṇ III. 76) 'grain 'a sacrificial accessory.' कुणपम् (Uṇ. III. 143).

478. √Vraṇa, to sound. In some texts it is √braṇa with a labial B. Pre. व्रणति । Per. वव्राण । 1 Fut. व्रणिता ॥

479. √Bhraṇa, to sound. Pre. भ्रणति । Per बभ्राण । I Fut. भ्रणिता ॥

480. √Dhvaṇa, to sound. Pre. ध्वणति । Per. दध्वाण । I Fut ध्वणिता ॥

481. √Dhaṇa, to sound. According to Mâdhaviya, the Sammatâ gives √dhraṇi. Some read √ dhaṇi. Pre. धणति ॥

ओणृ ४८२ अपनयने । ओणति । ओणांचकार ॥

482. √Oṇṛi, to remove, take or drag along. Pre. ओणति । Per. ओणांचकार । I Fut. ओणिता । Caus. ओणयति । Aorist मा भवानोणिणत् । Desi. ओणिणिषति । *Nouns* अवावन् । N. s. अवावा 'a thief' (III. 2. 75 S. 2980, VI. 4. 41 S. 2982) fem. अवावरी (IV. 1. 7. S. 456).

शोणृ ४८३ वर्णगत्योः । शोणति । शुशोण ॥

483. √Śoṇṛi, to go, move ; to become red. Pre. शोणति । Per. शुशोण । I Fut. शोणिता । Caus. शोणयति । Aorist अशुशोणत् । Desi. शुशोणिषति । Inten. शोशोणयते । Yaṅ luk शोशोण्टि । *Nouns* शोणः । शोणी । शोणा (IV. 1. 43 S. 501).

श्रोणृ ४८४ संघाते । श्रोणति ॥

484. √Śroṇṛi, to collect. Pre. श्रोणति । *Nouns*. श्रोणिः । श्रोणी । श्रोणा a star.

श्लोणृ ४८५ च । शोणादयस्त्रयोऽमी तालव्योष्मादयः ॥

485. √Sloṇṛi, to collect. Pre. श्लोणति । The three roots śoṇṛī, śroṇṛi and śloṇṛi begin with a palatal sibilant.

पैणृ ४८६ गतिप्रेरणश्लेषणेषु । प्रैणृ इति क्वचित्पठ्यते । पिप्रैण ॥

486. √Paiṇṛi, to go, 2. to send, 3. to embrace, adhere. (?) Some read it as √ Praiṇṛi ; others as √ laiṇṛi. Pre. पैणति ॥

486. A √Praiṇṛi, to go, approach, send, embrace.Per. पिप्रैण ।

486. B. √Laiṇṛi, to go' approach, send, embrace.

ध्रण ४८७ शब्दे । उपदेशे नान्तोऽयम् । रषाभ्याम्–(२३५) इति णत्वम् । ध्रणति । णोपदेशफलं यङ्लुकि । दंध्रन्ति । बण इत्यपि केचित् । बेणतुः, बेणिथ ॥

487. √Dhraṇa, *to sound.* This root has a न as its final in the upadeśa, *i. e.*, originally it is ध्रन, the न is changed to ण by VIII. 4. 1. S. 235. The result of the root being न ending originally appears in yaṅ luk ; where this न is changed to anusvâra. This anusvâra is then changed to न् before त्, as दंध्रन्ति । Of course, it must be remembered that न changed to ण by VIII. 4. 1. S. 235 is considered asiddha (VIII. 2. 1. S. 12) for the purposes of VIII. 3. 24. S. 123 or anusvâra change. As दंध्रन्ति । Had it been ण् originally, VIII. 3. 24. S. 123 would not have applied; and the form would have been दंध्रण्टि । The nasal in the reduplicate is by VII. 4. 85 S. 2643. Pre. ध्रणति ।

487 A. √Baṇa, to sound. Pre. बणति । Per. बबाण, बेणतुः, बेणुः, बेणिथ । According to Mâdhava, वण, भण and धण are also read here in some lists. According to Maitreya, भण is found in Daṇḍaka, and धण in Sanmatâ.

487 B. √Vaṇa, to sound. Pre. वणति । Per. ववाण । ववणतुः ॥

कनी ४८८ दीप्तिकान्तिगतिषु । चकान ॥

488. √Kanî, to shine, 2 to love, wish ; 3. to go. Pre. कनति । Per. चकान । I Fut. कनिता । *Nouns.* कन्या । कानीनः । कनकम् ॥

ष्टन ४८९, वन ४९० शब्दे । स्तनति । वनति ॥

489. √Shṭana, to sound. Pre. स्तनति । Per. तस्तान । I Fut. स्तनिता । Caus. स्तनयति । Aorist अतिष्टनत् । Desi. तिस्तनिषति । Inten. तंस्तन्यते । Yaṅ luk तंस्तनीति, or तंस्तन्ति । *Nouns.* स्तान्यम् । स्तनः । स्तन्यम् । अभिनिष्टानः (VIII. 3. 86. S 3193)

490. √Vana, to sound. Pre. वनति । Per. ववान । ववनतुः । I Fut वनिता । *Nouns.* वनिष्ठः (Uṇ IV. 2). The rectum, part of the entrails of an animal offered in sacrifice. वनम् । वन्या । वतिः (VI. 4, 37 S 2428) वन्तिः (VI. 4. 39. S. 3314) Past Part. Pass. वनितम् । Ger. वनित्वा ॥

वन ४९१, षण ४९२ संभक्तौ । वनेरर्थभेदात्पुनः पाठः । सनति । ससान । सेनतुः ॥

491. √Vana, 492 √Shaṇa, to honor. वन has been repeated here, as it has a different meaning from the वन mentioned before. It is conjugated like the preceding. Pre. वनति । Nouns वनिन् 'worshipping.' तद्वनः (Ken opanishad)

492. √Ṣhaṇa, ' to honor.' Pres सनति । Per. ससान Dual सेनतुः &c. In forming the Benedictive the following sûtra applies.

२३१९ । ये विभाषा । ६ । ४ । ४३ ॥

जनसनखनामात्वं वा स्याद्यादौ क्ङिति । सायात्—सन्यात् ॥

2319. There is optionally the substitution of long आ for the finals of जन्, सन् and खन् before an affix beginning with य and marked with an indicatory क् or ङ् ॥

NOTE:—Thus जायते or जन्यते (with यक्) जञ्जायते or जञ्जन्यते (with यङ्) । So also सायते or सन्यते, सासायते, or संसन्यते, खायते, or खन्यते, चाखायते or चङ्खन्यते ॥ Before the vikarana श्यन् of the Fourth class, which is ङित् according to I. 2. 4 ; the जा is *always* substituted for जन् by VII. 3. 79. No option is allowed there. Therefore in the Benedictive of √सन we have सायात् or सन्यात् ॥

492. √Shana, to honor. Pre. सनति । Per. ससान । सेनतुः । I Fut. सनिता । Bene. सायात् or सन्यात् । Desi. सिसनिषति or सिषासति (VII. 2. 49 S. 2618 read with VI. 4. 42 S. 2504). Inten. सासायते or संसन्यते । Yan luk संसनीति, or संसन्ति Dual संसातः । Noun सानुः 'peak,' Past. Part. Pass. सातः । Past. Part. Active सातवान् ॥

अम ४९३ गत्यादिषु । कनी दीप्तिकान्तिगतिषु इत्यत्र गतेः परयोः शब्दसंभक्त्योरादिशब्देन ग्रहः । अमति । आम ॥

493 √Ama, to go, 2. to sound 3. to honor. The word आदि in गत्यादिः means the गति of the root कनी no 488, plus the शब्द and संभक्ति of the roots that follow it. Pre. अमति । Per. आम । आमतुः । I Fut. अमिता । Caus. आमयति । Desi. । अमिमिषति । Nouns. अमः । आमठः 'Dysentery' आन् (with kvip) । अमित्रः । अमः । आन्त्रम् । Past. Part. Pass. अमितः or आन्तः ; अमितवान or आन्तवान् ॥

द्रम ४९४, हम्म ४९५, मीमृ ४९६ गतौ । द्रमति । दद्राम । हम्यन्त—(२२९९) इति न वृद्धिः । अद्रमीत् । हम्मति । जहम्म । मिमति । मिमीम । अयं शब्दे च ॥

494. √Drama, 495. √Hamma, 496 √Mimṛi, to go about ; run. Pre. द्रमति । Per. दद्राम । The Vriddhi is prohibited by S. 2299. I Fut. द्रमिता । Aorist अद्रमीत् । Caus. द्रमयति । Aorist अदिद्रमत् । Pass. अद्रमि or अद्रामि with चिण् and द्रमंद्रमम् or द्रामंद्रामम् with णमुल् । Fut. द्रमिष्यते or द्रामिष्यते or द्रमयिष्यते । Desi. दिद्रमिषति । Inten. दन्द्रम्यते Yan luk दन्द्रमीति or दन्द्रन्ति D दन्द्रान्तः । 1st P दन्द्रण्मि (VIII. 2. 65 S 2309). Imp. अदन्द्रन् (VIII. 2. 64 S. 341). Nouns द्रमिडः । दद्रमणः । द्रमः ॥

495. √Hamma to go. Pre. हम्मति । Per. जहम्म । I Fut. हम्मिता । Caus. हम्मयति । Aorist अजहम्मत् । Desi. जिहम्मिषति । Inten जेहम्यते । Yan luk जंहम्मीति or जंहन्ति । D. जंहन्तः । Imperfect अजंहन । Nouns हम्मतिः 'Knowledge.'

496. Mimṛi, to go. Some say it means 'to sound' also. Pre. मीमति । Per. मिमीम । मिमीमतुः । I Fut. मीमिता । Caus. मीमयति । Aorist अमिमीमत् । Desi मिमीमिषति । Inten. मेमीम्यते । Yan luk मेमीमीति or मेमीन्ति । Imperfect, अमेमीन् । Past part. Pass मीमितः । Ger. मीमित्वा ॥

चमु ४९७, छमु ४९८, जमु ४९९, जिमु ५००, झमु ५०१, अदने ।

497. √Chamu, 498 √Chhamu, 499 √Jamu, 500 √Jimu, 501 √Jhamu, to eat. When the root चमु is preceded by आ then the vowel is lengthened by the following sûtra. Pre. चमति । Per. चचाम । चेमतुः । I Fut. चमिता । Caus. चामयति । Desi. चिचमिषति । Inten. चञ्चम्यते । Yan luk चञ्चन्ति D. चञ्चान्तः । Nouns चमसः spoon. चमूः ॥

२३२० । ष्ठिवुक्लमुचमां शिति । ७ । ३ । ७५ ॥

एषामचो दीर्घः स्याच्छिति ॥

+आङि चम इति वक्तव्यम्+

आचामति । 'आङि' किम् । चमति । विचमति । अचमीत् । जिमिं केचित्पठन्ति । जेमति ॥

2320. Before any other Present character (शित्), the root vowel of ष्ठिव, क्लम, and आ-चम is lengthened.

Vârtika :– It should be stated that the rule applies to √cham, only then, when it is preceded by the preposition *â*, and not otherwise.

Thus आचामति । Why do we say 'when preceded by आ' ? Observe चमति, विचमति । The Aorist is अचमीत् । Some read √जिमि also here. Thus जेमति ॥

Note : The Kâśika reads this sûtra as ṣtivu-klamy-âchamâm śiti, having inserted the आ from the vârtika. √Klam lengthens its vowel before śyan by VII. 3. 74 S. 2519, the present rule produces this change before the affix śap also, which it gets by III. 1. 70.

497 A. √âchamu, Pre. आचामति । Imperative आचामतु । Imper. आचामत् । Caus. आचामयति । Nouns चमः । चमकः ॥

498. √Chhamu, to eat. Pre. छमति । Per. चच्छाम । I Fut. छमिता । Caus. छमयति । Pass. Aor. अच्छमि or अच्छामि । Nvul छामंछामम् । Fut. छमिष्यते or छामिष्यते or छमिविष्यते । Desi. चिच्छमिषति । Inten. चञ्छम्यते । Yań luk चञ्छमीति or चञ्छन्ति । D. चाञ्छान्तः ॥

499. √Jamu, to eat. Some read this as जिम । Pre. जमति । Per. जजाम जेमतुः । I Fut. जमिता । Past Parti. Pass. जान्तः । Ger. जमित्वा or जान्त्वा ॥

500. √Jimu, Pre. जेमति । Ger, जेमित्वा (?) or जिन्त्वा । Noun जेमनम् ॥

501. √Jhamu, Pre. झमति । Per. जझाम । I Fut. झमिता ॥

क्रमु ५०२ पादविक्षेपे ।

Now we take up the conjugation of 502. √Kramu, 'to walk, to step. This root takes श्यन् vikaraṇa also by the following sûtra.

२३२१ । वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः । ३ । १ । ७० ॥

एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे ॥

2321. The affix श्यन् is optionally employed in the active voice before a sârvadhâtuka affix after the following verbs ; भ्राश् 'to shine," भ्लाश् 'to shine,' भ्रम् 'to whirl,' क्रम् 'to walk,' क्लम् 'to be sad,' त्रस् 'to fear,' त्रुट् 'to cut.' and लष् 'to desire.'

Note:—Thus भ्राशते or भ्राश्यते 'he shines' ; भ्लाशते or भ्लाश्यते, he shines,' भ्रमति or भ्राम्यति 'he whirls' ; क्रामति or क्राम्यति 'he walks ; क्लामति or क्लाम्यति 'he is sad.' So also त्रस्यति or त्रसति ; त्रुट्यति or त्रुटति ; लष्यति or लषति ॥

Thus क्रम+शप्+ति or क्रम्+श्यन्+ति । Now applies the following sûtra.

२३२२ । क्रमः परस्मैपदेषु । ७ । ३ । ७६ ॥

क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति । क्राम्यति – क्रामति । चक्राम । क्राम्यतु-क्रामतु ॥

2322. The long is substituted in क्रम्, before a शित् affix, in the Parasmaipada.

As क्रामति, क्रामतः, क्रामन्ति or क्राम्यति &c. Per. चक्राम । Imperative क्राम्यतु or क्रामतु &c.

Why in the Parasmaipada ? Observe आक्रमते आदित्यः ॥

How do you explain the lengthening in उत्क्राम and संक्राम (Imperative 2nd Per. Sg.) For when हि is elided by लुक, (VI. 4. 105) then by I. 1. 63. the affix being dropped by a लु elision, it would produce no effect and so there ought to have been no lengthening ? This is no valid objection. The prohibition of I. 1. 63, applies to the अङ्ग *stem* after which the affix is elided. Here क्रम् is not a stem or anga with regard to हि, but it is a *stem* with regard to शप् as क्रम्+शप्+हि । Therefore, though हि is elided, the lengthening will take place by I. 1. 62, (प्रत्यय लक्षणम्) ॥

२३२३ । स्नुक्रमोरनात्मनेपदनिमित्ते । ७ । २ । ३६ ॥

अत्रे वेट । अक्रमीत् ॥

2323. The augment इट् is added to ârdhadhâtuka valâdi affixes after √स्नु and √क्रम्, only then when they do not occasion the taking of the Personal endings of the Atmanepada.

The roots स्नु and क्रम् are udâtta, and will get इट् augment naturally, the sûtra makes a restriction or niyama. The restriction is that when the roots themselves occasion âtmanepada affixes, then they do not take इट्, otherwise they will. Thus अक्रमीत् ॥

502. √Kramu, To walk, step. Pre. क्रामति । Per. चक्राम । चक्रमतुः । I Fut. क्रमिता । II Fut. क्रमिष्यति । Imperative क्रामतु । Imper. अक्रामत् । Pote. क्रामेत् । Bene. क्रम्यात् । Aorist अक्रमीत् । Condi. अक्रमिष्यत् । Caus. क्रमयति । Aorist अचिक्रमत् । Desi. चिक्रमिषति । Inten. चङ्क्रम्यते । Yan luk. चङ्क्रमीति or चङ्क्रन्ति । Past Part. Pass. क्रान्तः । Ger. क्रान्त्वा । (VI. 4. 18 S. 3329). or क्रमित्वा । Nouns क्रमः । क्रमकः । चङ्क्रमणं । नक्रः । क्रिमिः ॥

502 A. √Kramu, This root is âtmanepadi also when simple. (I. 3. 43. S. 2716). Pre. क्रमते । Per. चक्रमे । I Fut. क्रन्ता । II Fut. क्रंस्यते । Imper. अक्रमत । Poten. क्रमेत । Bene. क्रंसीष्ट । Aorist. अक्रंस्त । Condi. अक्रंस्यत ॥

Here end the thirty Parasmaipadi roots.

अथ रेवत्यान्ता अनुदात्तेतः ॥

The roots upto रेव inclusive are anudâttet.

अय ५०३, वय ५०४, पय ५०५, मय ५०६, चय ५०७, तय ५०८, णय ५०९, गतौ । अयते ॥

The Present is अयते । In forming the Perfect the following sûtra applies :—

२३२४ । दयायासश्च । ३ । १ । ३७ ॥

'दय' 'अय' 'आस्' एभ्य आम्स्याल्लिटि । अयांचक्रे । अयिता । अयिषीष्ट ॥

2324. After the verbs दय 'to give,' 'to go,' and 'to protect,' अय 'to go,' and आस 'to sit,' there is the affix आम्, when लिट् follows.

Thus अयाञ्चक्रे । First Future अयिता । Pot. अयेत । Benedictive अयिषीष्ट । Before the affix आम् of the Perfect and Aorist, the following rule applies :—

२३२५ । विभाषेटः । ८ । ३ । ७९ ॥

इणः परो य इट् ततः परेषां षीध्वं लुङ्-लिटां धस्य वा मूर्धन्यः स्यात् । अयिषीढ्वम्-अयिषीध्वम् । आयिष्ट । आयिढ्वम्-आयिध्वम् ॥

2325. The cerebral sound is optionally substituted for the ध of षीध्वम् and of the Aorist and the Perfect after the augment इट्, when the stem ends in इण् ॥

Thus अयिषीढ्वम् or अयिषीध्वम्। Aorist: आयिष्ट ; आयिढ्वम् or आयिध्वम् ॥

When upasargas ending in r र् such as nir, dur, or pra precede √aya, the r is changed to l by the following.

२३२६ । उपसर्गस्यायतौ । ८ । २ । १९ ॥

अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् । प्लायते-पलायते । निस् दुसो रुत्वस्यासिद्धत्वाच लत्वम् । निरयते । दुरयते ।'निर्दुरोस्तु निलयते । दुलयते । 'प्रत्ययः' इति त्विणो रूपम् । अथ कथम् 'उदयति विततोर्ध्वरश्मिरज्जो' इति माघः । 'इट' 'किट' 'कटी' इत्यत्र प्रश्लिष्टस्य एर्भविष्यति । यद्वा × अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् × । चक्षिङोङित्करणाज्ज्ञापकात् । वादित्वात् ववये । पेये । मेये । चेये । तेये । प्रणायते । नेये ॥

2326. ल is substituted for the र of a Preposition, when √अय follows.

Thus पलायते, प्लायते । The स् of the Prepositions दुस् and निस् is changed to र्, but this र् is not changed to ल्, because it is asiddha thus we have the forms निरयणम्, दुरयणम् । But there is a preposition निर् also, the र् of which is changed to ल्, as निलयनम् । See VII. 2. 46. So also there is a Preposition दुर् which forms दुलयते ॥

The word प्रत्ययः is not formed from प्रति + √अय but from प्रति + इण् ॥

If the root अय is Atmanepadi why is it conjugated as Parasmaipadi in the following line of Mâgha:—"udayati vitatordhva raśmi rajjau."? The word udayati is not formed by ud+√ay but from ud+ √i ; the √i is obtained by the analysis of √कटी as we have already shown. See √कटी। No. 342. Or the following maxim applies :

Maxim :—The âtmanepada, which a root may take because it is enunciated in the Dhâtupâtha as anudâtteta is not of universal application. This maxim we infer from the jñâpaka of √चक्षिङ् which is shown with an indicatory ङ। This root is of Adâdi class No. 7. It is read as anudâttet. It would have been conjugated in the âtmanepada by the mere fact of its being called anudâttet, the further adding of ङ् shows that the anudâttet âtmanepada is not universally valid.

In the Perfect of √वय, the rule VI. 4. 126 S. 2263 applies, because the root begins with a व and so we have ववये and not वेये । But पेये, मेये, चेये, तेये, प्रणायते and नेये ॥

503. √Aya, to go. Pre. अयते । Per. अयांचक्रे । I Fut. अयिता । II Fut. अयिष्यते । Imperative अयताम् । Imper. आयत । Pote. अयेत । Bene. अयिषीष्ट, अयिषीढ्व (or ध्व)म् । Aorist आयिष्ट, आयिढ्व (or ध्व)म् । Condi. आयिष्यत । Caus. आययति। Aorist आ + अयियत् । Desi. अयियिषते । Nouns आयः । अयः ॥

504. √Vaya, to go, move. Pre. वयते । Per. ववये । I Fut. वयिता । Desi. विवयिषते । Inten. वावय्यते ॥

504. √Vaya, in the Yaṅ luk. Pre. वावयीति or वावति। D. वावतः. Pl. वावयति, 2 S. वावयीषि, or वावसि, वावथः, वावथ, 1. S. वावयीमि or वावामि। वावावः, वावामः। Imperative वाव, वावयानि। Imper. अवावत्॥

505. √Paya, to go. Pre. पयते। Per. पेये। I Fut. पयिता॥

506. √Maya, to go. Pre. मयते। Per. मेये। I Fut. मयिता॥

507. √Chaya, to go. Pre. चयते। Per. चेये I Fut. चयिता॥

508. √Taya, to go, move; to guard, protect. Pre. तयते। Per. तेये। I Fut. तयिता। *Noun* तयः 'protection.'

509. √Naya, to go; to protect. According to Maitreya, it means 'to protect' also. Pre. नयते। Per. नेये। I Fut. नयिता॥ In some lists √चयि is also mentioned.

दय ५१०। 'दानगतिरक्षणहिंसादानेषु'। आदानं ग्रहणम्। दयांचक्रे॥

510. √Daya, to grant; give; 2. to go, 3. to protect; 4. to hurt; (to feel pity) 5. to accept. The word आदान means to accept. Pre. दयते। Per. दयांचक्रे। I Fut. दयिता। Nouns दयालुः, दया॥

रय ५११ गतौ।

511. √Raya, to go. Pre. रयते। Noun रायः॥

ऊयी ५१२ तन्तुसंताने। ऊयांचक्रे॥

512. √Uyi, to weave; sew. Pre. ऊयते। Per. ऊयांचक्रे। I Fut. ऊयिता। Caus. ऊययति। Aorist अ + ऊयियत्। Past Part. Pass. ऊतः। Past Part Active ऊतवान् Ger. ऊयित्वा। Noun ऊतिः॥

पूयी ५१३ विशरणे दुर्गन्धे च। पूयते। पुपूये॥

513. √Pûyi, to split up; to stink; to putrefy. Pre. पूयते। Per. पुपूये। I Fut. पूयिता। Caus. पूययति। Aorist. अपूपुयत। Desi. पुपूयिषते। Inten. पोपूय्यते। Yaṅ luk. पोपूयीति or पोपोति। D. पोपूतः। Past Part. Pass पूतः। Past Part. Active पूतवान्। Ger. पूयित्वा। Nouns पूयः 'pus.' पूतिः॥

क्नूयी ५१४ शब्दे उन्दे च। चुक्नूये॥

514. √Knûyi, to make a creaking sound; to be wet. Pre. क्नूयते। Per. चुक्नूये। I Fut. क्नूयिता। Caus. क्नोपयति (VII. 3. 36 S. 2570). Aorist. अचुक्नुपत्। Yaṅ luk चोक्नूयीति। Noun चेलक्नोपं वृष्टदेवः 'It rained enough to wet the garment.'

क्ष्मायी ५१५ विधूनने। चक्ष्माये॥

515. √Kshmâyi, to shake; tremble. Pre. क्ष्मायते। Per. चक्ष्माये। I Fut. क्ष्मायिता। Caus. क्ष्मापयति। Aor. अचिक्ष्मपत्। Caus. Yaṅ luk चाक्ष्मापयतीति। Desi. चिक्ष्मायिषते। Inten. चाक्ष्माय्यते। Yaṅ luk चाक्ष्मायीति, or चाक्ष्माति D. चाक्ष्मीतः। Imperative चाक्ष्मीतात् and चाक्ष्मीहि। Past Part. Pass. क्ष्मातः। Past Past Act. क्ष्मातवान्॥

स्फायी ५१६, ओप्यायी ५१७, वृद्धौ। स्फायते, पस्फाये, प्यायते॥

516. √Sphâyi, 517 √Opyâyi, to grow large or fat; to swell. Pre. स्फायते। Per. पस्फाये। I Fut. स्फायिता। Cause. स्फावयति। (VII. 3. 41. S. 2593). Aorist अपिस्फवत्। Yaṅ luk पास्फावयति। Nouns, स्फाः। स्फायडम्। स्फीरः। Past. Part. Pass. स्फीतः। (VI. 1. 22. S. 3044). Past. Part. Pass. स्फीतवान्॥

517. ओप्यायी वृद्धौ 'To grow large.' Present प्यायते । In forming the Perfect, पी is substituted by the following.

२३२७ । लिड्यङोश्च । ६ । १ । २९ ॥

लिटि यङि च प्यायः पीभावः स्यात् । पुनः प्रसङ्गविज्ञानात्पीशब्दस्य द्वित्वम् । 'एरनेकाचः–(२७२) इति यण् । पिप्ये । पिप्यति । पिप्यिरे ॥

2327. There is substitution of पी for प्याय्, when the affixes of the Perfect (लिट्) and the Intensive (यङ्) follow.

The anuvritti of the word विभाषा ceases. The phrase प्यायः पी of the preceding Ashtâdhyâyi sûtra is drawn into this by force of the word च 'and'; thus आपिप्ये, आपिप्याते, आपिप्यिरे । The rule of substitution of पी being a subsequent rule, would have debarred reduplication which precedes it in order. The reduplication, however, takes place after the substitution, by force of the maxim of पुनः प्रसङ्ग "occasionally the formation of a particular form is accounted for by the fact that a preceding rule is allowed to apply again, after it had previously been superseded by a subsequent rule." Thus पी+लिट् = पि+पी+त = पि+प्य+ए (VI. 4. 82 S. 272 the य being substituted) = आपिप्ये with the affix आ । So also in the Intensive, as आपेपीयते, आपेपीयेते, आपेपीयन्ते ॥

In the Aorist, the following rule applies :—

२३२८ । दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ।३ । १ । ६१ ॥

एभ्यश्च्लेश्चिणवा स्यादेकवचने तशब्दे परे ॥

2328. चिण् is optionally the substitute of च्लि, when त, the third person singular of the Atmanepada follows, after the verbs दीप्, 'to shine,' जन् 'to be produced', बुध् 'to teach or know', पूर् 'to be full', ताय् 'to extend or protect' and प्याय् 'to swell'.

